# Gangastuti or Gangadashahara Stotram

# ગઙ્ગાસ્તુતી ગઙ્ગાદશહરાસ્તોત્રમ્ ચ

## Document Information

Text title : gangAstuti 1

File name : gangAstuti.itx

Category : devii, nadI, stotra, devI

Location : doc_devii

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com

Latest update : October 25, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# Gangastuti or Gangadashahara Stotram

# ગઙ્ગાસ્તુતી ગઙ્ગાદશહરાસ્તોત્રમ્ ચ

શ્રીગણેશાય નમઃ ।
ઈશ્વર ઉવાચ ।
ચતુર્ભુજાં ત્રિનેત્રાં ચ સર્વાવયવશોભિતામ્ ।
રત્નકુમ્ભસિતામ્ભોજવરદાભયસત્કરામ્ ॥ ૧॥

શ્વેતવસ્ત્રપરીધાનાં મુક્તામણિવિભૂષિતામ્ ।
એવં ધ્યાયેત્સુસૌમ્યાં ચ ચન્દ્રાયુતસમપ્રભામ્ ॥ ૨॥

ચામરૈર્વીજ્યમાનાં ચ શ્વેતચ્છત્રોપશોભિતામ્ ।
સુપ્રસન્નાં ચ વરદાં કરુણાર્દ્રનિરન્તરામ્ ॥ ૩॥

સુધાપ્લાવિતભૂપૃષ્ઠાં દિવ્યગન્ધાનુલેપનામ્ ।
ત્રૈલોક્યનમિતાં ગઙ્ગાં સર્વદેવૈરભિષ્ટુતામ્ ॥ ૪॥

દિવ્યરત્નવિભૂષાં ચ દિવ્યમાલ્યૈર્વિભૂષિતામ્ ।
ધ્યાત્વા જલે યથાપ્રોક્તં તથાચાર્યાં ચ પૂજયેત્ ॥ ૫॥

ૐ નમો ભગવત્યૈ ઐં શ્રીં હ્રીં હિલિ હિલિ મિલિ મિલિ
ગઙ્ગે માં પાવય પાવય સ્વાહા ।
અનેન મન્ત્રેણ આગમોક્તેન પઞ્ચપુષ્પાઞ્જલિં શ્રીગઙ્ગાયૈ નિવેદયેત્ ।
મયા હતાનિ પુષ્પાણિ પૂજાર્થં પ્રતિગૃહ્યતામ્ ।
દશાંગં ગુગ્ગુલં ધૂપં સુગન્ધં ચ મનોહરમ્ ॥ ૬॥

ગૃહાણ મઙ્ગલં દીપં ઘૃતવર્તિસમન્વિતમ્ ।
ચતુર્વિધં ચ નૈવેદ્યં રસૈઃ ષડ્ભિઃ સમન્વિતમ્ ।
રુદ્રરૂપે! નમસ્તેઽસ્તુ ગૃહાણ વરદા ભવ ॥ ૭॥

પરદારપરદ્રવ્યપરદ્રોહપરાઙ્મુખઃ
ગઙ્ગા બ્રૂતે કદાઽઽગત્ય મામયં પાવયિષ્યતિ ॥

ઇતિ વૈશ્વાનરનારદસમ્વાદે દશપાપહરાયાઃ શ્રીગઙ્ગાધ્યાનાર્ચનવિધિઃ ।

એવં ધ્યાનાર્ચનં વિધાય પશ્ચાજ્જલાન્તરે સ્થિત્વા, જ્યેષ્ઠે માસિ સિતે પક્ષે પ્રતિપદાદિદશમીપર્યન્તં દશવિધપાપપ્રણાશાય પ્રતિદિનમુત્તરોત્તરદિનવૃદ્ધ્યા દશહરાસ્તોત્રપાઠમહં કરિષ્યે ।

અથ દશહરાસ્તોત્રપ્રારમ્ભઃ ।

બ્રહ્મોવાચ –

નમઃ શિવાયૈ ગઙ્ગાયૈ શિવદાયૈ નમો નમઃ ।
નમસ્તે રુદ્રરૂપિણ્યૈ શાઙ્કર્યૈ તે નમો નમઃ ॥ ૧॥

નમસ્તે વિષ્ણુરૂપિણ્યૈ બ્રહ્મામૂર્ત્યૈ નમો નમઃ ।
સર્વદેવસ્વરૂપિણ્યૈ નમો ભેષજમૂર્તયે ॥ ૨॥

સર્વસ્ય સર્વવ્યાધીનાં ભિષક્શ્રેષ્ઠ્યૈ નમોઽસ્તુ તે ।
સ્થાણુજઙ્ગમસમ્ભૂતવિષહન્ત્ર્યૈ નમો નમઃ ॥ ૩॥

સંસારવિષનાહિન્યૈ જીવનાયૈ નમો નમઃ ।
શાન્તિસન્તાનકારિણ્યૈ નમસ્તે શુદ્ધમૂર્તયે ॥ ૪॥

સર્વસંશુદ્ધિકારિણ્યૈ નમઃ પાપારિમૂર્તયે ।
ભુક્તિમુક્તિપ્રદાયિન્યૈ ભદ્રદાયૈ નમો નમઃ ॥ ૫॥

ભોગોપભોગદાયિન્યૈ ભોગવત્યૈ નમો નમઃ ।
મન્દાકિન્યૈ નમસ્તેઽસ્તુ સ્વર્ગદાયૈ નમો નમઃ ॥ ૬॥

નમસ્ત્રૈલોક્યભૂષાયૈ ત્રિપથાયૈ નમો નમઃ ।
નમસ્ત્રિશુક્લસંસ્થાયૈ ક્ષમાવત્યૈ નમો નમઃ ॥ ૭॥

ત્રિહૂતાશનસંસ્થાયૈ તેજોવત્યૈ નમો નમઃ ।
નન્દાયૈ લિઙ્ગધારિણ્યૈ નારાયણ્યૈ નમો નમઃ ॥ ૮॥

નમસ્તે વિશ્વમુખ્યાયૈ રેવત્યૈ તે નમો નમઃ ।
બૃહત્યૈ તે નમસ્તેઽસ્તુ લોકધાત્ર્યૈ નમો નમઃ ॥ ૯॥

નમસ્તે વિશ્વમિત્રાયૈ નન્દિન્યૈ તે નમો નમઃ ।
પૃથ્વ્યૈ શિવામૃતાયૈ ચ સુવૃષાયૈ નમો નમઃ ॥ ૧૦॥

પરાપરશતાઢ્યાયૈ વરદાયૈ નમો નમઃ ।
પાશજાલનિકૃ઱્ન્તિન્યૈ અભિન્નાયૈ નમો નમઃ ॥ ૧૧॥

શાન્તાયૈ ચ વરિષ્ઠાયૈ વરદાયૈ નમો નમઃ ।

ઉસ્રાયૈ સુખદોગ્ધ્ર્યૈ ચ સઞ્જીવિન્યૈ નમો નમઃ ॥ ૧૨॥

બ્રહ્મિષ્ઠાયૈ બ્રહ્મદાયૈ દુરિતઘ્ન્યૈ નમો નમઃ ।
પ્રણતાર્તિપ્રભઞ્જિન્યૈ જગન્માત્રે નમોઽસ્તુ તે ॥ ૧૩॥

સર્વાપત્પ્રતિપક્ષાયૈ મઙ્ગલાયૈ નમો નમઃ ।
શરણાગતદીનાર્તપરિત્રાણપરાયણે ॥ ૧૪॥

સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુતે ।
નિર્લેપાયૈ દુર્ગહન્ત્ર્યૈ દક્ષાયૈ તે નમો નમઃ ॥ ૧૫॥

પરાત્પરતરે તુભ્યં નમસ્તે મોક્ષદે સદા ।
ગઙ્ગે મમાગ્રતો ભૂયા ગઙ્ગે મે દેવિ પૃષ્ઠતઃ ॥ ૧૬॥

ગઙ્ગે મે પાર્શ્વયોરેહિ ત્વયિ ગઙ્ગેઽસ્તુ મે સ્થિતિઃ ।
આદૌ ત્વમન્તે મધ્યે ચ સર્વં ત્વં ગાં ગતે શિવે ॥ ૧૭॥

ત્વમેવ મૂલપ્રકૃતિસ્ત્વં હિ નારાયણઃ પરઃ ।
ગઙ્ગે ત્વં પરમાત્મા ચ શિવસ્તુભ્યં નમઃ શિવે ॥ ૧૮॥

ય ઇદં પઠતિ સ્તોત્રં ભક્ત્યા નિત્યં નરોઽપિ યઃ ।
શ઼ૃણુયાચ્છ્રદ્ધયા યુક્તઃ કાયવાક્ચિત્તસમ્ભવૈઃ ॥ ૧૯॥

દશધાસંસ્થિતૈર્દોષૈઃ સર્વૈરેવ પ્રમુચ્યતે ।
સર્વાન્કામાનવાપ્નોતિ પ્રેત્ય બ્રહ્મણિ લિયતે ॥ ૨૦॥

ઇમં સ્તવં ગૃહે યસ્તુ લેખયિત્વા વિનિક્ષિપેત્ ।
નાગ્નિચોરભયં તત્ર પાપેભ્યોઽપિ ભયં ન હિ ॥ ૨૧॥

જ્યેષ્ઠે માસિ સિતે પક્ષે દશમી હસ્તસંયુતા ।
સંહરેત્ત્રિવિધં પાપં બુધવારેણ સંયુતા ॥ ૨૨॥

તસ્યાં દશમ્યામેતચ્ચ સ્તોત્રં ગઙ્ગાજલે સ્થિતઃ ।
યઃ પઠેદ્દશકૃત્વસ્તુ દરિદ્રો વાપિ ચાક્ષમઃ ॥ ૨૩॥

સોઽપિ તત્ફલમાપ્નોતિ ગઙ્ગાં સમ્પૂજ્ય યત્નતઃ ।
પૂર્વોક્તેન વિધાનેન યત્ફલં સંપ્રકીર્તિતમ્ ॥ ૨૪॥

યથા ગૌરી તથા ગઙ્ગા તસ્માદ્ગૌર્યાસ્તુ પૂજને ।
વિધિર્યો વિહિતઃ સમ્યક્ સોઽપિ ગઙ્ગાપ્રપૂજને ॥૨૫॥

યથા શિવસ્તથા વિષ્ણુર્યથા વિષ્ણુરુમા તથા ।
ઉમા યથા તથા ગઙ્ગા ચતૂરૂપન્ન ભિદ્યતે ॥ ૨૬॥

વિષ્ણુરુદ્રાન્તરં યચ્ચ શ્રીગૌર્યોરન્તરં યથા ।
ગઙ્ગાગૌર્યન્તરં ચાપિ યો બ્રૂતે મૂઢધીસ્તુ સઃ ॥ ૨૭॥

રૌરવાદિષુ ઘોરેષુ નરકેષુ પતત્યધઃ ।
અદત્તાનામુપાદાનં હિંસા ચૈવાવિધાનતઃ ॥ ૨૮॥

પરદારોપસેવા ચ કાયિકં ત્રિવિધં સ્મૃતમ્ ।
પારુષ્યમનૃતં ચૈવ પૈશુન્યં ચાપિ સર્વશઃ ॥ ૨૯॥

અસમ્બધ્દપ્રલાપશ્ચ વાઙ્મયં સ્યાચ્ચતુર્વિધમ્ ।
પરદ્રવ્યેષ્વભિધ્યાનં મનસાનિષ્ટચિન્તનમ્ ॥ ૩૦॥

વિતથાભિનિવેશશ્ચ માનસં ત્રિવિધં સ્મૃતમ્ ।
એતાનિ દશ પાપાનિ હર ત્વં મમ જાહ્નવિ ॥ ૩૧॥

દશપાપહરા યસ્માત્તસ્માદ્દશહરા સ્મૃતા ।
એતૈદર્શવિધૈઃ પાપૈઃ કોટિજન્મસમુદ્ભવૈઃ ॥ ૩૨॥

મુંચ્યતે નાત્ર સન્દેહો બ્રહ્મણો વચનં યથા ।
દશત્રિંશચ્છ્તાન્સર્વાન્ પિતૄનથ પિતામહાન્ ॥ ૩૩॥

ઉધ્દરત્યેવ સંસારાન્મન્ત્રેણાનેન પૂજિતા ।
ૐ નમો ભગવત્યૈ દશપાપહરાયૈ ગઙ્ગાયૈ નારાયણ્યૈ રેવત્યૈ ।
શિવાયૈ દક્ષાયૈ અમૃતાયૈ વિશ્વરૂપિણ્યૈ (વિશ્વમુખ્યાયૈ)
નન્દિન્યૈ તે નમો નમઃ ॥ ૩૪॥

જ્યેષ્ઠે માસિ સિતે પક્ષે દશમ્યઽાં બુધહસ્તયોઃ ।
ગરાનન્દે વ્યતીપાતે કન્યાચન્દ્રે વૃષે રવૌ ।
દશયોગે ચ યઃ સ્નાત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૫॥

સિતમકરનિષણ્ણાં શુભ્રવર્ણાં ત્રિનેત્રાં
કરધૃતકલશોદ્યત્સોત્પલામત્યભીષ્ટામ્ ।
વિધિહરિહરરૂપાં સેન્દુકોટીરજુષ્ટાં
કલિતસિતદુકૂલાં જાહ્નવીં તાં નમામિ ॥ ૩૬॥

આદાવાદિપિતામહસ્ય નિગમવ્યાપારપાત્રે જલં

પશ્ચાત્પન્નગશાયિનો ભગવતઃ પાદોદકં પાવનમ્ ।
ભૂયઃ શમ્ભુજટાવિભૂષણમણિર્જહ્નોર્મહર્ષેરિયં
કન્યા કલ્મષનાશિની ભગવતી ભાગીરથી દૃશ્યતે ॥ ૩૭ ॥

વિષ્ણુપાદાબ્જસમ્ભૂતે ગઙ્ગે ત્રિપથગામિનિ ।
બ્રહ્મદ્રવેતિ વિખ્યાતે પાપં મે હર જાહ્નવિ ॥ ૩૮ ॥

જાહ્નવી સર્વતઃ પુણ્યા બ્રહ્મહત્યાપહારિણી ।
વારાણસ્યાં વિશેષેણ ગઙ્ગા ચોત્તરવાહિની ॥ ૩૯ ॥

ગઙ્ગા ગઙ્ગેતિ યો બ્રૂયાદ્યોજનાનાં શતૈરપિ ।
મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૪૦ ॥

ઇતિ સ્કન્દે મહાપુરાણે એકાશીતિ સાહસ્ર્યાં સંહિતાયાં તૃતીયે કાશીખણ્ડે
ધર્માબ્ધિસ્થા ગઙ્ગાસ્તુતિઃ અથવા શ્રીગઙ્ગાદશહરાસ્તોત્રં સમ્પૂર્ણમ્ ।

અથાગમોક્તં સ્તોત્રં એવમ્ ।

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by PSA EASWARAN, NA

*Gangastuti or Gangadashahara Stotram*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*